# धर्मशास्त्रदृष्ट्या संस्कारप्रमाणविमर्शः

**विष्णु चौधरी**
बिजौरी, दाङ, नेपाल ।
Email: bishnuchaudhariktm12@gmail.com
https://doi.org/10.3126/haimaprabha.v23i1.66738

**लेखसारः**

अस्मिन् लेखे धर्मशास्त्रदृष्ट्या संस्कारप्रमाणविमर्शः इति विषये शास्त्रीयविषयत्वेन मुख्यतः धर्मशास्त्राधारेण संस्कारसम्बद्धाः विषया विवेचिताः सन्ति। विश्वधर्मशास्त्रइतिहासे संस्कृतधर्मशास्त्रस्य विशिष्टं स्थानं दृष्टिगोचरीभवति। वैदिककालद् आरभ्यः अधुनातनसमयं यावत् सहस्रशः विशिष्टकृतयः संस्कृतभाषायामेव संरचिताः सन्ति। तेषां अध्ययनं अतिवः अपरिहार्यं वर्तते। अतः धर्मशास्त्रनिर्दिष्टानां विविधसंस्कारसम्बद्धविषयाणां ज्ञानार्जने लेखोऽयं उपयोगी भवति । धर्मानुष्ठानं सर्वमनुष्याणां कृते मङ्गलकारकं भवति । ईहलोके परत्र च मनुष्याणां पोषणम्, तोषणं, रक्षणञ्च धर्मेणैव भवति । विषयेऽस्मिन् विमति वा भिन्नं मतं नैव दृश्यते। श्रुतिस्मृतिनिर्दिष्टानि कर्माणि एव संस्काराः। संस्कृयते अनेन श्रौतेन कर्मणा स्मार्तेनवापुरुष इति संस्कारः। निजदेहात् भिन्नः सन् सम्पादितस्य विहितस्य वा कर्मणः उत्पन्नं उत्कर्षविशेषं संस्कार इति कथ्यते । ब्राह्म–दैवभेदात् द्विविधस्य संस्कारस्य धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयप्राप्त्यर्थं एवञ्च शौर्यवीर्यप्रज्ञादिगुणानां जागरणार्थं च महत्त्वं वर्तते मानवजीवने। वेदनिर्दिष्टैर्गर्भाधानादिपुण्यकर्मभिर्द्विजानां शारीरिके संस्कारे विहिते सति इहलोके परलोके च पुण्यप्राप्तिर्जायते इत्यस्यालेखस्य निष्कर्षो वर्तते । अस्य सम्पादने सामग्रीसङ्कलने पुस्तकालयमुपयुज्य संस्कारसम्बद्धाः धर्मशास्त्रीयग्रन्थाः मुख्यसामग्रीत्वेन स्वीकृता वर्तन्ते । विषयवस्तुनिर्वचने व्याख्याविश्लेषणशैली प्रयुक्ता अस्ति। विषयवस्तुव्यवस्थापनाय लेखकमितिपद्धतिः (एपिए) अवलम्बिता वर्तते।

**शब्दकुञ्जीः -** पाकयज्ञः, संस्कारः, हविर्यज्ञः, पुरुषार्थः, अनसूया।

## विषयपरिचयः

पौरस्त्यधर्मशास्त्रवाङ्मये नियम-निर्देशकरणे विविधाः पद्धतयोः विकसिता दृश्यन्ते । ते सर्वेऽपि धर्मशास्त्रसम्बद्धाः प्रामाणिकाश्च भवन्ति । मनुष्यो वेदनिर्दिष्टविधेरनुसरणं करोति चेत् शास्त्रनिर्दिष्टफलप्राप्त्यधिकारी भवति। वैदिकविधिपूर्वकं विहितानां संस्काराणां माध्यमेन मानवो ब्रह्मबोधमपि कर्तुं समर्थो भवति। संस्कारमाध्यमेनमूलरूपेणात्मशुद्धिरन्तःकरणशुद्धिर्देहशुद्धिश्च जायते। मनुष्याणां मानसिकं कायिकं धार्मिकं बौद्धिकं चोन्नयनार्थं कर्तव्यान्यनुष्ठानान्येव संस्काराणां स्वरूपाणि। एतादृशः सनातनोऽभ्यासो मनुष्याणां न केवलं कायिकमपि तु सर्वात्मकं परिष्कारंशुद्धिंपूर्णतां च विधास्यति । वैदिके सनातनसमाजे

अनेकानि धार्मिककृत्यानि विधानानि तथा च संस्कृतयो नियमा अनुष्ठानानि च विद्यन्ते । संस्कारोऽयं महर्षिभिः, अन्येषां संस्काराणामपेक्षायां विशिष्टः गौरवपूर्णः संस्कारः मन्यते । द्विजः पित्रोः शरीराद् जायमानेऽपि द्विजसम्बन्धिनं शास्त्रीयाधिकारं प्राप्तुमेतस्य संस्कारस्यापेक्षा भवति । व्यापारेणानेन अर्थवृद्धिः,आयु-तेजसादीनां प्रकटनम्, अन्नादिनां प्राप्तिः, पशुकामादि-फलप्राप्तिश्च जायते । एतदेव च संस्कारस्य प्रयोजनं भवतीति । अस्माकं समाजे प्रतिदिनं संस्कारात् सामाजिकप्रतिष्ठां लब्धये बहुरूप्यकाणि व्ययीकृत्वा भक्ष्याभक्ष्य-भोज्य-पदार्थान् निर्माय भोजं प्रदर्शयन्ति जनाः । अनया रीत्या आध्यात्मिकविश्वासो नैव जायते । प्रत्युत तस्य प्रभावेण आध्यात्मिकनिष्ठायां हानिर्दृश्यते समाजे । तथापि यने केनापि प्रकारेण सांस्कृतिकसंस्काराः अद्यपर्यन्तं प्रचलिताः सन्ति । तेन अस्माकं समाजे संस्कारस्य बीजं नैव नष्टमित्यनुभूयते । धर्मशास्त्रे व्यावहारिकी सद्यः फलजननी धर्मशास्त्रपरम्परानुमोदिता च ज्ञानराशि वर्तते । परं पद्धतिमिमामवलम्व्य व्यवहारे सदाचारपालने कतिपयधर्मशास्त्रिणःभ्रष्टमार्गा इव दृश्यन्ते । एतादृशी समस्यैवास्यलेखस्य प्रेरकभूता वर्तते । उपर्युक्तसमस्यायाः समाधानमेवास्याध्ययनस्योद्देश्यं वर्तते । अत एव तस्यां समस्यायां केन्द्रिभूयः अत्र धर्मशास्त्रजिज्ञासूनुपकर्तुं लेखोऽयं लिखितो वर्तते । अस्य अध्ययनस्य सीमायां मनुस्मृतिः, याज्ञवल्क्यस्मृतिश्चालेखस्यास्य सीमात्वेन निर्धारितौ स्तः । धर्मशास्त्रदृष्ट्या संस्कारप्रमाणनिरुपणपूर्वकं तस्य महत्वप्रदर्शनञ्चास्यानुसन्धानकार्यस्य क्षेत्रमस्ति ।

## अध्ययनविधिः

प्रस्तुतलेखस्य सम्पादनक्रमे पारम्परिकविधेरनुसरणंवैज्ञानिकपद्धतेरपयोगश्च विहितः । तत्रापि मुख्यरुपेण वैज्ञानिकशोधविधेरवलम्बनं कृतमस्ति । इदं चानुसन्धानं गुणात्मकं वर्तते । पुस्तकालयस्योपयोगं विधाय प्राथमिकसामग्रीत्वेन धर्मशास्त्रस्य मूलग्रन्थाः, द्वितीयकसामग्रीत्वेन च तेषां टीकोपटीकाग्रन्थाः स्वीकृता वर्तन्ते । व्याख्या-वर्णनमाध्यमेन तथ्यविश्लेषणं कृत्वा निष्कर्षितं वर्तते । विषयवस्तुव्यवस्थापनाय आधुनिकप्रचलानुसारेण एपिएशैल्यारुपयोगो विहितोऽस्ति ।

## विश्लेषणस्य सैद्धान्तिकाधाराः

धर्मशास्त्रदृष्ट्या संस्कारप्रमाणविमर्शः, इत्यत्र विषयविश्लेषणायाद्यपर्यन्तं न केनापि विदुषा निश्चितसैद्धान्तिकाधाराः प्रस्तुताः सन्ति । मनुस्मृति-याज्ञवल्क्यस्मृति-निर्णयसिन्धु-पारस्करगृहसूत्रादिषु ग्रन्थेषु संस्कार- सम्बद्धा ये विषयाः नियमाश्च वर्णिताः सन्ति, त एव सिद्धान्तरुपेणा स्वीक्रिता दृश्यन्ते । अतो लेखेऽस्मिन्नपि प्राचिनाचार्यनिर्दिष्टाः पूर्वकार्यस्वरुपास्ते विषया एव सैद्धान्तिकाधाररुपेण गृहीताः सन्ति ।

## व्याख्याविश्लेषणञ्च

आलेखेऽस्मिन् संस्कारस्वरूपम्, संस्कारसङ्ख्याविमर्शः,संस्कारस्य आध्यात्मिक-सामाजिक-सांस्कृतिक-नैतिकादिविविधप्रयोजनम्, संस्कारस्य महत्त्वम्, संस्काराणामावश्यकता, संस्कारासंपादने ( अकरणे ) हानिरित्यादयो विषयाः समाविष्टाः सन्ति । तेषां समेषां यथासम्भवमुपस्थापनं विधीयते ।

**संस्कारपरिचयः**

सम् उपसर्गपूर्वकात् कृ धातोः भावे इति सूत्रेण संज्ञाद्योतक-कर्तृभिन्नकारकार्थे सति अकर्तरि कारके संज्ञायाम्' इति सूत्रेण घञ् प्रत्यये संस्कारशब्दस्य निष्पत्तिर्भवति। शरीरात्मनो क्रियाः संस्कार इति अवगम्यते। तेनैवप्रकारेण मेदिनीकोषे प्रतिपन्नः अनुभवः मानसकर्म इत्यादिभिः पर्यायशब्दैः संस्कारस्योल्लेखो विद्यते। न्यायमते संस्कारो नाम कश्चन गुणविशेषः । स च त्रिविधः वेगाख्य-संस्कारः, भावनाख्यसंस्कारः, स्थितिस्थापकसंस्कारः। एतेषु मध्ये वेगनामकसंस्कारः मूर्तद्रव्येषु तिष्ठति। सोऽपि कर्मजो वेगजभेदेन द्विधा भवति। स्थितिस्थापक-संस्कारश्च मूलरूपेण पृथिव्याः गुणः ।भावनाख्य-संस्कारआत्मवृत्तिः, अतीन्द्रियः, उपेक्षानात्मकनिश्चयजन्यश्च भवति। इत्थं वर्णितं कारिकावल्याम् -

संस्कारभेदो वेगोऽथस्थितिस्थापकभावने। मूर्तमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित्॥
स्थितिस्थापकसंस्कारः क्षिप्तौकेचिच्चतुर्ष्वपि। अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणम्॥
भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः। उपेक्षानात्मकस्तस्यनिश्चयः कारणं भवेत्॥
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते इति।(भट्टाचार्यः, २०६३, पृ. ४९२-९३, कारि. १५८-६०)।

परन्त्वत्र धर्मशास्त्रेषु संस्कारो नाम संस्करणम्, परिष्करणम्, शोधनम्, शुद्धीकरणम्, इत्यादयोऽर्था अवगम्यन्ते। ऋग्वेदे पवित्रीकरणमित्यर्थे संस्कारस्य वर्णनं विद्यते। येन कर्मणा किञ्चिद् वैशिष्ट्यं जायते, तदेव संस्कारपदवाच्यम्। 'संस्क्रियते अनेन इति' करणव्युत्पत्या ईदृशार्थस्याधिगमो जायते ।जैमिनिसूत्रेषु संस्कारशब्दस्य बहुधा प्रयोगोऽवलोक्यते। सर्वेषु स्थलेषु शब्दोऽयं पवित्रतार्थे वा प्रयुक्तो दृश्यते। शबरस्वामिनापि जैमिनीयसूत्रस्य व्याख्यानावसरे संस्कारशब्दस्य सम्यक् विवेचनं कृतं वर्तते।'संस्कारो नाम स भवति यस्मिञ्जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य' अर्थात् यदनन्तरं वस्तुनि योग्यताविशेष आगच्छति तदेव संस्कारपदस्यार्थः।

**संस्कारस्वरूपम्**

संस्कारस्वरूप-विषयेचाचार्याणां समानं मतं न दृश्यते। विविधैराचार्यै भिन्नं भिन्नं मतं प्रदर्शितं दृश्यते। संस्कारो द्विवधः - ब्राह्मसंस्कारो दैवसंस्कारश्च। संस्कारगणपतौ पारस्करगृह्यसूत्रे च ब्राह्मोदैवश्चेति द्विधा उल्लिखितो वर्तते। गर्भाधानादिस्नानन्तो ब्राह्मः। पाकयज्ञहविर्यज्ञसौम्यश्चेति दैवः। ब्राह्मसंस्कारेण संस्कृते ऋषीणां समानतां सायुज्यं गच्छन्ति। दैवेनोत्तरेण संस्कारेण तु संस्कृतौ देवानां समानतां सालोक्यतां सायुज्यतां गच्छन्तीत्यलमति प्रसङ्गेन इति सूत्रार्थः।

तथा च हारीतवचने गर्भाधानादिः स्मार्त ब्राह्मो स्नानान्त इति। तत्र गर्भाधानात् स्नानपर्यन्ताः संस्काराः ब्राह्म इति पाकयज्ञादयः दैवसंस्काराः इति भागद्वये विभक्ता दृश्यन्ते। गर्भाधानादि स्मार्त ब्राह्मः स्नानान्त इति सौम्या सोमयागा अग्निष्टोमादयः। अत्र षोडश ब्राह्मसंस्काराः।

गर्भाधानं पुसवनं सीमन्तो जातकर्म च ।नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया॥
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः। केशान्तः स्नानमुद्वाहो विवाहोऽग्निपरिग्रहः॥

त्रेताग्निसङ्ग्रहश्चैव संस्काराः षोडशस्मृताः । नवैता कर्णवेधान्ता मन्त्रवर्ज्यं क्रियाविधौ ॥ (रामकृष्णः, संस्कारगणपतिः) ।

पाकयज्ञाहविर्यज्ञासौम्याश्च दैवा इति । शुद्धिकारकसंस्काराधिकारगम्यश्च ब्रह्मसंस्कार इति गुणाधायकसंस्कार दैवसंस्कार इति ।

## संस्कारसङ्ख्याविमर्शः

संस्कारसङ्ख्याविषये च स्मृतिकारेषु नास्ति मतैक्यम् । सम्पूर्णेषु धर्मसूत्रेषु संस्कारस्य वर्णनं सङ्ख्यायाः परिगणानञ्च नोपलभ्यते तथापि तेषूपनयनविवाहोपाकर्मोत्सर्जनानध्यायाशौचानां विषये नियमस्य समावेशो दृश्यते ।

गौतमेन तु अष्टचत्वारिंशत् संस्काराः वर्णिताः सन्ति । ते यथा -

१. गर्भाधानम्, २. पुंसवनम्, ३. सीमन्तोनयनम्, ४. जातकर्म, ५. नामकर्म, ६. अन्नप्राशनम्, ७. चौलकर्म, ८. उपनयनम्, ९. चत्वारिवेदव्रतानि, महानाम्नी व्रतम्, १०. उपनिषद्व्रतम्, ११. महाव्रतम्, १२. गोदानव्रतम्, १३. स्नानम् (समावर्तनम्), १४. विवाह-सहचारिणीसंयोगः, १५. पञ्चमहायज्ञः, १६. देवयज्ञः, १७. पितृयज्ञः, १८. भूतयज्ञः, १९. मनुष्ययज्ञः, २०. सप्तपाकयज्ञः, २१. पार्वणः, २२. श्राद्धम्, २३. श्रावणी, २४. आग्रहायणी, २५. चैत्री, २६. आश्वयुजी, २७. अग्न्याधानम्, २८. अग्निहोत्रम्, २९. दर्शपूर्णमासौ, ३०. चातुर्मास्य, ३१. आग्रयणेष्टि, ३२. निरुढपशुबन्धः, ३३. सौत्रामणि, ३४. सप्तसोमसंस्था (अग्निष्टोमः), ३५. अत्यग्निष्टोमः, ३६. उक्थ्यः, ३७. षोडशी, ३८. वाजपेयः, ३९. अतिरात्रम्, ४०. अप्तोर्यामः, ४१. दया, ४२. क्षमा, ४३. अनुसूया, ४४. शौचः, ४५. अनायास, ४६. मङ्गलम्, ४७. अकार्यम्, ४८. अस्पृहाः । एतेषु संस्कारेषु संस्कृतः पुरुषः सायुज्यं सालोक्यमधिगच्छति सर्वसमृद्धिभूत्वाऽपि भवति ॥ (गौतमः, धर्मसूत्रम्- १.८,१४,२४) ।

मनुना गर्भाधानात् मृत्युपर्यन्तं त्रयोदशस्मार्तसंस्काराः वर्णिताः सन्ति । १. गर्भाधानम् २. पुंसवनम् ३. सीमन्तोनयनम् ४. जातकर्म ५. नामधेयम् ६. निष्क्रमणम् ७ अन्नप्राशनम् ८. चूडाकरणम् ९. उपनयनम् १०. केशान्तः ११. समावर्तनम् १२. विवाह १३. अन्त्येष्टि इति ॥(मनुस्मृतिः, २.१६) ।

अङ्गिरास्तु पञ्चविंशतिसंस्कारानङ्गी करोति । यथा-

गर्भाधानं पुसवनं सीमन्तो वलिरेव च ।जातकृत्यं नामकर्म निष्क्रमोऽनाशनं परम् ॥
चौलोकर्मोपनयनं तद्व्रतानां चतुष्टयम् ।स्नानोद्वाहौचाग्रयणमष्टकाश्च यथायथम् ॥
श्रावयामाश्वयुज्यां च मार्गशीर्ष्यां च पार्वणम् । उत्सर्गश्चाप्युपाकर्म महायज्ञश्च नित्यशः ॥
संस्कारा नियतेह्यते ब्राह्मणस्य विशेषतः ।पञ्चविंशति संस्कारैः संस्कृता ये द्विजातयः॥
ते पवित्राश्च योग्याश्च श्राद्धादिषु सुयन्त्रताः ॥ (संस्कार मयुखः, सन् १८४८, पृ. २२३ ) ।

सुमन्तुमहर्षिणा तु पञ्चविंशति संस्काराः स्वीकृताः । तेषां नामानि यथा १. गर्भाधानम् २. पुंसवनम् ३. सीमन्तोनयनम् ४. विष्णुवलि ५ जातकर्म ६. नामकर्म ७. निष्क्रमणम् ८. अन्नप्राशनम् ९. चौलम् १०. उपनयनम् ११. महानाम्नीव्रतम् १२. उपनिषदव्रतम् १३. महाव्रतम् १४. गोदानव्रतम् १५. स्नानम् (समावर्तनम्) १६. विवाह १७ आग्रयणेष्टि १८. अष्टका १९. श्रावणी २०. आश्वयुजी २१. मार्गशीर्षा २२.

पार्वणम् २३.उत्सर्ग २४.उपाकर्म २५. महायज्ञ इति । परवर्ती स्मृतिकाराः षोडश संस्कारानेव स्वीकुर्वन्ति । व्यासस्मृत्यनुसारेण एते षोडश संस्काराः -

गर्भाधानं पुसवनं सीमन्तो जातकर्म च ।नामक्रिया निष्क्रमणोऽन्नप्राशनं वपनक्रिया ॥

कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः ।केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ॥

त्रेताग्निसङ्ग्रहश्चेति संस्काराः षोडशस्मृताः ॥(व्यासस्मृति १.१३.१५) ।

पारस्करगृह्यसूत्रे त्रयोदश संस्कारा उल्लिखिताः सन्ति । यथा १. विवाह २. गर्भाधानम् ३. पुंसवनम् ४. सीमन्तोनयनम् ५. जातकर्म ६. नामधेयम् ७. निष्क्रमणम् ८. अन्नप्राशनम् ९. चूडाकरणम् १०. उपनयनम् ११. केशान्तिः १२. समावर्तनम् १३. अन्त्येष्टिश्चेति ।संस्कारेषु कर्णवेधसंस्कारस्य अन्ते गणनाय कारणमस्ति यत् परिवर्तितकाल एव तस्य संस्काररूपेण मान्यता जाता । किञ्च प्रारम्भेषु सः केवलम् शरीरगतस्य श्रृङ्गारस्यैव एकं साधनमासीत् ।

प्रायशः निबन्धकाराः दैवज्ञस्य वर्णनं त्यजन्ति । उदाहरणार्थं वीरमित्रोदय-स्मृतिचन्द्रिका-संस्कारमयुखेषु गौतमस्य सूची उद्धृता । अत्र केवलं दैहिकसंस्कारा एव संस्काररूपेण स्वीकृताः दृश्यन्ते । महामुनिगौतमोऽष्टचत्वारिंशत् संस्काराणां सूच्याम् अन्त्येष्टिसंस्कारस्य परिगणनं न करोति । सामान्यरूपेण अयं गृह्यधर्मस्मृतिसूत्रेष्वपि संस्कारत्वेन न गृह्यते । अतः संस्कारविषयपरकपरिवर्तितग्रन्थेषु च प्रायः उपेक्षितोऽस्ति । अस्य मूले विचारोऽयमासीत् यत् अन्त्येष्टिरेकोऽशुभः संस्कारो विद्यते । परमन्तरमन्त्येष्टिरपि संस्काररूपेण स्वीकृतास्ति । मनुयाज्ञवल्क्यजातुकर्णैरपि अन्त्येष्टिसंस्कारः संस्कारत्वेन मन्यते । अन्त्येष्टिः समस्तसंस्कारेष्वन्तिमसंस्कारोऽस्ति । अस्य सङ्कलनमन्त्येष्टिवैदिकमन्त्रेण सह मुख्यरूपेण कृतमस्ति । स्वामिदयानन्दसरस्वतीविरचिते संस्कारविधिरिति नामके ग्रन्थे पण्डित-भीमसेनशर्मणा विरचिते षोडशसंस्कारविधिरिति नामके ग्रन्थे च केवलम् षोडशसंस्काराणामेव ग्रहणमस्ति । एते गर्भाधानादि-षोडशसंस्काराः प्रायः द्विजानां कृते सर्वत्र स्वीक्रियन्ते । साम्प्रतमार्यसंस्कृतेः षोडश-संस्काराः बाहुल्येन प्रचलिताः सन्ति । वैदिकाः संस्कारास्तु योगेष्वेव सम्प्राप्यन्ते, ब्रह्मसंस्कारा एव षोडशसंस्कारपरिधौ समायान्ति । प्रायः शास्त्रीयधारेणैव एषः निर्णयः सामान्यलोकोक्तिक्रमेण समायाति । यतो हि मनुजः प्रथम मातृगर्भादुत्पन्नो भवति । पश्चात् संस्कारेभ्यः समुत्पन्नो भवति । द्वाभ्यां जन्म-संस्काराभ्यां जायते इति द्विजः । मातृगर्भान्निस्सरणानन्तरं जातकर्मः । यज्ञोपवितादिसंस्कारेण संस्कृतो मनुष्य एव गार्भिकवैजिकएनोनिर्वहणपूर्वकं गर्भजन्यदोषाद् बीजदोषात् चः मुक्तः । प्रतिसंस्कारेण संस्कृतः पुरुषः संस्कारवान् भूत्वा सम्पूर्णो भवति । संस्कारेण मानवः दोषान्मुक्तो गुणैश्च युक्तः सन् सम्पूर्णत्वमेति अर्थात् सुसंस्कृतः सम्पूर्णत्वमेति ।अतऽस्माकं समाजेऽपि षोडशः संस्कारा एव प्रचलिताः सन्ति । तस्मादेवास्मिन् शोधपत्रे षोडशसंस्कारामेव ग्रहणं कृतम् । तेषामेव विषये चर्चाग्रे करिष्यते । ते च संस्काराः यथा-

१. गर्भाधानम् २. पुंसवनम् ३. सीमन्तोनयनम् ४. जातकर्म ५. नामकरणम् ६. निष्क्रमणम् ७. अन्नप्राशनम् ८. चूडाकर्म ९. कर्णवेधः १० उपनयनम् ११. वेदारम्भः १२. केशान्तः १३. समावर्तनम् १४. विवाहः, १५. अग्न्याधानम् १६. अन्त्येष्टिश्च ।

## संस्कारप्रयोजनम्

संस्कारप्रयोजनविषये बहूनि मतानि प्रचलितानि सन्ति । सामान्यतया संस्कारेणैव मानवाः शरीरगर्भादिजन्यदोषनिवारणाय, चतुःपुरुषार्थ साधनार्थम्, मरणोपरान्तोत्तमगतिप्राप्त्यर्थम्, नैतिकाचारव्यवहारपूर्वकं जीवनं यापनाय प्रभवन्ति । राजवलीपाण्डेयमहोदयेन हिन्दुसंस्कारनामके ग्रन्थे संस्कारस्य प्रयोजनविषये उल्लिखितमस्ति । हिन्दुसंस्कारपुस्तके संस्कारस्य लौकिकं प्रयोजनमशुभप्रभावस्य प्रतीकारः अभीष्टाकर्षणं चेति ।आत्माभिव्यक्ति-माध्यमेन संस्कारप्रयोजनं सिद्ध्यति । तेनैव प्रकारेण सांस्कृतिकप्रयोजनं, नैतिकप्रयोजनं च ।व्यक्तित्वनिर्माण एव विकास, आध्यात्मिकविकाससम्बद्धो विषयः तत्रोद्धृतास्ति । (राजवलिपाण्डेय, हिन्दुसंस्कारः) । परन्त्वत्र संस्कारस्य प्रयोजनसम्वद्धानां मुख्यतया त्रयाणां विषयाणां विश्लेषणं विधास्यते ।

## संस्कारस्य आध्यात्मिकप्रयोजनम्

अस्माकं सनातनहिन्दुसमाजे नैका संस्काराः क्रियन्ते । गर्भाधानादिसंस्कारात् मृत्युपर्यन्तं सम्पादितैःसंस्काररूपैः कर्मभिरेव मानवा इह जन्मनि एवञ्च परलोकेऽपि उत्तमगतिं प्राप्तुं शक्नुवन्तीति विश्वासो भवति । संस्कारो द्विविधो ब्राह्मोदैवश्चेति इति उपर्युल्लिखितं वर्तते । गर्भाधानादयः ब्राह्मसंस्काराः मन्यन्ते, तथैव पाकयज्ञ-हविर्यज्ञ-सोम्याश्च दैवाः संस्काराः कथ्यन्ते । हारितवचनमुद्धृतं कृत्वा हरिहरेणोक्तं यत् - गर्भाधानविधिना गर्भाधानसहितम् उपनयनसंस्कारं कृत्वा ब्रह्मगर्भधारणं भवति । ब्रह्मगर्भधारणेन गर्भः पुष्टो भवति । प्रसवेन पुंस्त्वभावस्योत्पन्नम्, सीमन्तोन्नयनकर्मणि च पितृदोषः निवार्यते । रेतोक्तः गर्भोपघातात्मक-पञ्चदोषेषु मध्ये जातकर्मणाप्रथमः, नामकरणेन द्वितीयः, अन्नप्राशनेन तृतीयः, चूडाकरणेन चतुर्थः, एवं स्नानेन पञ्चमः दोष निवार्यते । एतेन गर्भाधानादिसंस्काराः गर्भं पापमुक्तं (निर्दोषं) कुर्वन्ति । उपनयनादिसंस्कारेण संस्कृतो वेदाध्ययनेन युक्तश्च ब्राह्मणःदेवकार्येपितृकार्ये च योग्यो भवतीति । हारीतः – गर्भाधानवदुपेतो ब्रह्मगर्भं संदधाति, पुंसवनात्पुंसीकरोतिफलस्नपनात्पितृज-पाप्मानमपोहति जातकर्मणा प्रथममपोहति, नामकरणेन द्वितीयः, अन्नप्राशनेन तृतीयः, चूडाकरणेन चतुर्थः, स्नानेन पञ्चमम् । एतैरष्टभिर्गार्भसंस्कारैगर्भोपघातात्पूतो भवति । उपनयनाद्यैरेभिरनुव्रतैश्चाष्टभिः स्वच्छन्दसंमितो ब्राह्मणः देवपितृणां परं पात्रं भवति ।

हारितवचनमुद्धृतं कृत्वा हरिहरः कथयति – ब्रम्हसंस्कारात् संस्कृतः पुरुषः ऋषिभिस्सह सायुज्यं प्राप्नोति । उत्तरदैवसंस्कारेण संस्कृतः जनः देवसमं सालोक्यतां सायुज्यताञ्च प्राप्नोति इति । दैवसंस्कारस्य ब्राह्मसंस्कारस्य च क्रमेण ऋषिसायुज्यदैवसायुज्यं च प्रयोजनम् । ब्राह्मसंस्कारसंस्कृतो जन ऋषीणां समानतां सायुज्यतां च गच्छति । दैवोनोत्तरेणसंस्कारेणानुसंस्कृतो देवानां समानतां सालोक्यतां गच्छति इति । (पाठक, पास्करगृहसूत्रम्, पृ. १८८) ।

तेनैव प्रकारेण मनुरपि कथयति– वेदाध्ययनम्, ब्रह्मचर्यव्रतम्, सावित्रीहोमः, सायंप्रातःहोम, वेदत्रयसम्बन्धिव्रतधारणम्, देवर्षिपितृतर्पणरूपयागानुष्ठानम्, ज्योतिष्टोमादियागानुष्ठानादिकं विधाय ब्रह्मसायुज्ययोग्यशरीरं प्राप्यते अर्थात् स्वात्मानं ब्रह्मसायुज्याधिकारिणं साधयति जन इति । यथामनु -

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः ।महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥(मनु, मनुस्मृतिः २.२८)। अत्र वेदाध्ययनेन व्रतैर्मधुमांसवर्जनादिनियमैरित्याद्याध्यात्मिकं प्रयोजनम्।

## सामाजिं सांस्कृतिकञ्च प्रयोजनम्

अस्माकं सनातनहिन्दुसमाजे प्रचीनकालादेव परम्परागतरूपेण व्यवहारे विविधाः संस्काराः प्रचलिताः सन्ति। प्राचीनसमाजे संस्कारस्योपयोगश्च धार्मिकानुष्ठाने क्रियते स्मः। परन्तु आधुनिके समये सामाजिकसांस्कृतिकसंस्कारस्य प्रयोजनं दृश्यते । एवं प्रकारेण यस्य संस्कारस्य अभिप्रायोऽस्ति सोविशुद्धरूपेण धार्मिकक्रिया दैहिकमानसिक-गतिपरिष्काराय अनुष्ठीयते, येन समाजस्य मान्यसदस्यरूपेण स्वं स्थापयितुं शक्येत। किन्तु संस्कारे परम्परागताः धार्मिकविधिविचाराः सहवर्तिनश्च नियमा अपि समाविष्टाः सन्ति। येषामुद्देश्यं केवलदैहिकसंस्कार एव नास्ति। अपितु जनानां सम्पूर्णव्यक्तित्वस्य परिष्कारः पूर्णताञ्च अस्ति।

सामान्यत इदं स्वीक्रियते यद् विधिपूर्वकं संस्काराणामनुष्ठानेनः संस्कृते जने विलक्षणत्वेन साकं वर्णनीयगुणानां प्रादुर्भावो भवति। अतो वक्तुं पारयामो यत् संस्कारः केवलं धार्मिकः सामाजिको वा आडम्बरो नास्ति । अस्य महत्त्वस्य उपादेयतायाश्च ज्ञानाभावे सामाजिके परिबन्धने एते करणीया सन्तीति मत्वा स्वयमेवास्माभिः एतेषां महत्वं न्यूनीकृतम्। विवाहसंस्कार एको महत्वपूर्णः संस्कारोऽस्ति। अनेन संस्कारेण स्त्रीपुरुषयोर्मध्ये स्थायिविश्वासं तादात्म्यं च स्थापितो भवति। विवाहसंस्कारेण बद्धयोः दम्पत्योर्मध्ये सर्वदा विवादस्यावकाशो न सम्भवति । यतोहि सुखेषु दुःखेषु वा तयोः सहभागिता वर्तते । तेनैव प्रकारेणोपनयनसंस्कारश्च शास्त्रनिर्दिष्टः सांस्कृतिकः संस्कारोऽस्ति।

## संस्कारस्य नैतिकप्रयोजनम्

अस्य संस्कारस्य मूलभूतं लक्ष्यं मानवे नैतिकगुणस्थापनमेवास्ति। अतः संस्काराणां सम्पादनेन मानवजीवने नैतिकगुणानां विकासो भवति। एषु संस्कारेषु जीवनस्य सम्पूर्णा व्यवस्था सम्पादिताऽस्ति। यथा मानवसमाजे सम्यग् रूपेण जीवनं यापयितुं समर्थो भवति मनुष्यः। गौतमधर्मसूत्रे अष्टात्मगुणसहितं चत्वारिंशत् संस्कारा उल्लिखिता सन्ति। तेषां अष्टात्मगुणनामानि यथाः दया, क्षमा, अनसूया, शौचः, शमः, उचितव्यहारः, निरीहता, निर्लोभता च। एतान् गुणान् त्यक्त्वा अन्यसंस्काराः क्रियन्ते चेत् तेषां ब्रह्मसायुज्यं ब्रह्मसामीप्यं वा न प्राप्तुं न शक्यते । संस्कारेणैव मानवजीवने नीतिनियमाः व्यावहारिकाः धर्माश्च निर्धारिता वर्तन्ते । तेषां पालनमेव मनुष्यस्य कर्तव्यं भवति । उदाहरणार्थं –गर्भिणीधर्माः, अनुपनीतधर्माः, ब्रह्मचारीधर्माः, स्नातकधर्माश्चेति।

## संस्कारस्य महत्वम्

अस्माकं सनातनहिन्दुसमाजः आध्यात्मिकरूपेण पुनर्जन्म सिद्धान्तेन प्रभावितो वर्तते । पुनर्जन्ममाश्रितैवास्माकं चिन्तनं प्रवर्तते। यथाश्रीमद्भागवतगीतायाम् उल्लिखितो वर्तते।

न त्वेवाहं जातु नासं न त्वंनेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् ।।(गीता - अ.२.१२) ।

अतः प्रायशः भारतीयानांमनीषिणां मतमस्ति यत् पूर्वजन्मनि कृतानां शुभाऽशुभानां वा कर्मणांप्रारब्धरूप-संस्कारेण सहैवशिशुरूपेण मनुष्येह संसारे जायते । जायमाने शरीरे संरचितायां बुद्धौ च तत्तत्संस्काराणां प्रभाव आत्मनि संपृक्तत्वेन अनुभूयते । अत एव पूर्वसंस्कारानाश्रित्यैव अस्मिन् जन्मनि भिन्नेषु कार्येषु प्रवर्तते । प्रायशो दृष्टिपथममायाति यत् जनः जन्मत एवाध्यात्मिकविचारं प्रति आकृष्टो भवति । दुष्कर्मस्वेव चान्यस्य मनो रमते । तत्रैतेन स्पष्टं यत् प्राक्जन्मतः संस्कारान् गृहीत्वैव मानवोऽपरं जन्म गृह्णाति ।

एतेषां संस्काराणां निश्चितस्मृतिः नवजातशिशो न भवति । अत एव एतेषु विद्यमानेषु संस्कारेषु किञ्चिद् संशोधनं परिवर्धन-परिवर्तनञ्च कर्तुं शक्यते । एभिः संस्कारैः तस्य शिशो व्यक्तित्वस्य सर्वाङ्गीणविकासो भवति । समये समये एतदर्थं याः क्रियाःसम्पाद्यन्ते, तस्या एव संस्कार इति संज्ञा । एभिः संस्कारैर्जातकस्य शारीरिकमानसिकबौद्धिकाध्यात्मिकक्षमतानां नैरन्तर्येण विकासो भवति । व्यक्तित्वस्य चानेन माध्यमेन सम्पूर्णविकास क्रियते ।

**संस्काराणामावश्यकता**

समस्तवेदपुराणधर्मशास्त्र-ग्रन्थेषु संस्काराणामावश्यकता वर्णिताऽस्ति । यथा सुवर्णादिपदार्थानां तपनमाध्यमेन परिशोधनपूर्वकंमलनिवारणेन तेषां सौन्दर्यकरणं प्रकाशनञ्च क्रियते तथैव मानवेषु मानवीयगुणानां चाधानाय तेषां विकासाय च निगमागमसम्मतसंस्काराः सर्वथा अपेक्ष्यन्ते । अभिप्रायोऽस्ति यद्यस्य मनुष्याः विधिपूर्वकंसंस्कारसम्पन्नाः भवेयुः । वस्तुतो विधिपूर्वकसंस्कारसाधनेन दिव्यज्ञानमुत्पाद्य आत्मनः परमात्मस्वरूपे प्रतिष्ठानमेव संस्कारस्योद्देश्यमस्ति ।

'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति चोच्यते शास्त्रेषु । मानवजीवनप्राप्तेश्च सार्थकताऽपिचतुर्थसोपानसिद्धिरूपेण भुक्त्या सिध्यति । तत्र संस्कारेण शरीरादिशुद्धिर्भवति । शुद्धिकरणेन अस्माकं सन्मार्गे साधुतया प्रवृत्तिर्भवति । सज्जनप्रवृत्या यथोद्देश्यं मोक्षादिकं प्राप्यते । स च संस्कारो द्विविधः १. मलापयनम् २. अतिशयाधानञ्च । तत्र अपनयनं नाम दुरीकरणम् । केनचित् विशिष्टपदार्थेन तद्दर्पणस्य प्रकाशवैशिष्ट्यानयनमतिशयाधानम् । अत्र दिव्यशक्ति-विशेषो वा प्रकाशविशेष एव अतिशयशब्देन लभ्यते । आधानमुपस्थापनम् अर्थात् संस्कारविशेषस्य आधानमतिशयाधानम् । एवमेव भावना-प्रतियत्नगुणाधानादिशब्दाः संस्कारवाचका एव सन्ति । यथोक्तं मनुस्मृतौ -

गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः ।बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ।। (मनुः, २००१, श्लोकसं. १/२७) ।

द्विजस्य जातकर्मोपनयनादिसंस्कारैः बीजगर्भादिजन्मदोषाणां पापानां वा अपमार्जनं भवति । मनोरिदमपि कथनमस्ति यत् द्विजानां गर्भाधानादिशारीरिकसंस्काराः वैदिकमन्त्रैः कार्याः संस्काराः इह लोके परलोके च पवित्रयन्ति । याज्ञवल्क्योऽपि अयमेव विचारं प्रतिपादयति । यथा च अङ्गिरस्मृतौ (?)

चित्रकर्म यथानेकै रागैरुन्मील्यते शनैः ।ब्राह्मण्यमपि तद्वत्स्यात्संस्कारैर्मन्त्रपूर्वकैः ।।(अङ्गिरस्मृति, ..... ?, ४.१०) ।

शोभनाकृतिचित्रनिर्माणार्थं तत्र वैशिष्ट्यातिदेशार्थं कर्मकुशलैः आवश्यकतामनुभूय तत् तद् वर्णैः रञ्जनं क्रियते तथैव मानवानां चरित्रनिर्माणार्थं संस्काराणां सविधिः प्रतिपादनमावश्यकम्।

संस्कारः व्यक्तिविशेषादारम्भ परिवारक्रमेण द्विश्वं यावत् समाजस्य राष्ट्रस्य च हितसाधनं करोति। संस्कारेण मानवानां मनसि आस्तिकभावना उन्मीलिता प्रतिष्ठिता च भवति । मानवः सन्ध्यावन्दनजपहवनादिनित्यनैमित्तिककर्माणि यथाविधिः सम्पादयन् स्वजीवनं सात्विकं सुखमयञ्च करोति। महर्षिमन्वनुसारेण स्वाध्यायव्रतहोमदेवर्षितर्पणयज्ञसन्तानोत्पत्तीज्यादिभिः पञ्चमहायज्ञानामनुष्ठानैश्चेदं शरीरं ब्रह्मप्रयुक्तं क्रियतेऽर्थात्, ब्रह्मप्राप्त्यर्थं योग्यतां सम्पादयति।

मानवानां जीवने आचारग्रहणार्थं तस्योत्तरोत्तराभिवृद्ध्यर्थञ्च जन्मतो मृत्युपर्यन्तं षोडशसंस्काराः क्रमिकविकासार्थमेव विहिताः । आधानमपि समर्थस्त्रीपुरुषयोः ऋतुकालिकयोगे सत्त्वयुक्तेन चित्तादिना संलग्नमुहूर्तदिवस- ग्रहकरणयोगैश्चाधानाज्जन्मपर्यन्तमेव विविधसंस्काराः मन्त्रतन्त्रयन्त्रौषधादिभिः वैदिकमन्त्रयोगैश्च क्रियाः सम्पाद्यन्ते। गर्भाधानानन्तरं मासानां क्रमेण जीवस्य द्वितीयमासे प्रथमः, षष्ठमासे द्वितीयः संस्कारः क्रियते। वस्तुतः रहस्यमिदं वैज्ञानिकम्। मातुराहारविहारेण गर्भस्थः शिशुः स्वजीवनतत्त्वं गृह्णाति। न केवलं भोजनादिकमपि तु मातुः मानसिकी स्थितिरपि महत्वपूर्णा भवति। महाभारते मातुः श्रवणक्रियाप्रसङ्गे सुभद्रार्जुनयोः कथा प्रसिद्धा वर्तते । अर्जुन एकदा स्वपत्नीं शुभद्रां चक्रव्यूहनीतिमश्रावयत्। तत्र कथासमाप्तेः पूर्वमेव निद्रापन्ना सुभद्रा शेषांशं न श्रुतवती। तेनैव अज्ञातेन शेषांशेन अभिमन्युः चक्रव्यूहे वद्धः मृतश्च। अनेन ज्ञायते यत् मातुः सर्वाः क्रियाः संस्काररूपाः बालकं प्रभावयन्ति। ऋग्वेदे उक्तं यत् पितरौ च द्वावपि सदैव सावधानौ भवेतां येन सन्तति अन्यथाऽऽरयुक्तो न भवेत्।

प्रसूतः शिशुः प्रथमतः शूद्रो (संस्कारसहितः) भवति । ततः उपनयनादिसंस्कारेण संस्कृतः वर्णाश्रमविधानं कृत्वा मानवीय-सर्वाङ्गीणविकासश्च जायते। द्विजो वेदाध्यायनेन विप्रत्वं प्राप्य विद्योपासनया ब्रह्मसाक्षात्कारेण च ब्राह्मणो भवति। उक्तञ्च यथा -

जन्मना जायते शूद्रः संस्कारात् द्विज उच्यते। वेदाभ्यासी भवेद्विप्रः ब्रह्म जानाति ब्राह्मणः॥ इति।

संस्कारः कस्यचिदपि धर्मस्य सम्प्रदायस्य वा महत्त्वपूर्णमङ्गं भवति । इतिहासस्य प्रारम्भकालादारभ्यः धार्मिक-सामाजिकैकतायाः प्रभावपूर्णो माध्यमः संस्कार एव आसीत्। संस्कारस्य प्रादुर्भावः प्राचीनतमे कालेऽभवत्। कालक्रमेण च विविधैः कारणैः भूगोले विभिन्नानि परिवर्तनानि जातानि तथापि वैदिकवाङ्मयेन सह निगमागमसभ्यतात्वेन अद्यावधि ते संस्काराः जीविता सन्ति। वैदिकसंस्काराणां वर्णनं वेदेषु सूक्तेषु कतिपयब्राह्मणग्रन्थेषुगृह्यसूत्रेप्रधर्मसूत्रेषुस्मृतिषु परवर्तिनिबन्धग्रन्थेषु च प्राप्यते। वस्तुतः संस्कारोः मानवीयात्मशक्तेव्यञ्जकः प्रतीकात्मकानुष्ठानेन लभ्यः गम्यश्च। तत्र च बहवोऽभिनयात्मकोद्गाराः धर्मवैज्ञानिकमुद्राश्च प्राप्यन्ते। एतस्य मूलभूतमाधारभूतं वा तत्त्वमज्ञात्वा जनाः संस्कारं बालक्रीडावत् मन्यन्ते। संस्कारः समाजस्य आदर्शं महत्वाकाङ्क्षां च प्रकटयति। संस्काराणाङ्गभूतं विधिविधानं कर्मकाण्डश्च प्रायः सार्वभौमिकः स्यात्। प्राचीनसंस्कृतिषु तेषां विशिष्टं स्थानमासीत्, अर्वाचीनधर्मेष्वपि पर्याप्तं प्रतिनिधित्वं तस्य विद्यते । अतः प्राचीनकालीनसभ्यताज्ञानाय वैदिकसंस्काराणां ज्ञानमावश्यकं भवति । एवमिदानीन्तनसामाजिकविकृतीनामपनयनाय जनाः संस्कारैः बोधयितव्याः।

समाजविज्ञानदृष्ट्याऽपि संस्काराणामध्ययनस्यावश्यकता दृष्टिगोचरी भवति । प्रत्येकं समाजस्य किञ्चत् मूल्यं भवति, अवधारणा च भवति, एतत्संरक्षणेन निष्ठा विश्वासश्च वर्धते । एतदर्थं सामाजिकीं धार्मिकीं च प्रेरणामपेक्ष्य अनुष्ठानस्यापि आवश्यकता वर्तते । प्रत्येकसम्प्रदाये भवति स्वधारणया संपृक्ताः केचन संस्काराः, परमुपर्युक्तानां लक्ष्यं तु पूर्वमेव सङ्केतितम् । संस्कारपरम्परया प्रेरिताः जना विभिन्नानुष्ठानैः सुसंस्कृताः भवन्त्यतस्ते सफलाः । केवलं विधिसंविधानमवलम्व्य काचिद् सामाजिकी व्यवस्था तावत् पर्यन्तं स्थायिनी न भवति यावत् मानवीयं मूल्यं सामाजिकचिन्तनं दृढं प्रतिष्ठितं च न भवति । विधिसंविधानावबोधानार्थं सत्कारार्थञ्च समाजस्य सदस्यानां मनः सुसंस्कृतं भवेत् । एतदर्थमेव विभिन्नसंस्काराः पूर्वजैराविष्कृताः ।

सामाजिकता मानवस्य प्रकृतिः, मानवीयप्रकृतिश्च सर्वत्र प्राप्यते । परं कस्यचिद् देशस्य जातिविशेषस्य वा यानि कानिचिद् मूल्यानि भवन्ति तानि प्रति आस्थां विश्वासं चोत्पादयितुं सप्रयत्नं संस्काराणामाधानस्यावश्यतता भवति । तदैव समाजिकनीतिनां मूल्यानाञ्च विकासो भवति । अस्माकं राष्ट्रस्य सुदृढाः सामाजिकी व्यवस्था जीवनस्य नियमितसंस्काराणां सुदृढमाधारं प्राप्य सुप्रतिष्ठितास्ति ।

संस्काराः जीवनस्य भिन्नेषु अवसरेषु महत्त्वं पवित्रतां च प्रयच्छन्ति । मानवजीवनस्य विकासस्य भिन्नानि चरणानि न केवलं शारीरिकविकासेनैव सम्वद्धानि सन्ति, अपि तु अस्य सम्बन्धः मनुष्यस्य बुद्ध्या, अन्तःकरणेन, आध्यात्मिकाभिव्यक्त्या सहापि वर्तते । एतदर्थं प्रत्येको जनः सचेष्टो भवेत् । अस्मात् कारणात् संस्काराणामावश्यकता सुष्पष्टमेव दृश्यते ।

अतिपरिचयाभावादालस्याद्वा जीवनस्य विविधेषु चरणेषु प्रायश औदासीन्यमायाति । मानवीयविकासक्रमे तेषां चरणानां महत्त्वं विस्मृतमिव भाति । अज्ञानादपि शोषणादिविकारेण च जीवनमूल्यं प्रति अवज्ञाभावश्च तत्र समागच्छति । संस्काराः एते सामाजिकतन्द्रामवज्ञाञ्च निराकुर्वन्ति । जीवनविकासक्रमस्य महत्त्वं सामाजिकस्तरे स्पष्टत्वेन प्रकटितो भवति । संस्कारं विना जीवनस्य विकासक्रमे शरीरस्य नियमितावश्यकता आर्थिकव्यापारवत् वा निरसाः चमत्कारहीनाश्च भविष्यन्ति । वस्तुतः संस्कारैरेव जीवनं सङ्गीतमयं सुखदंशान्तिदं च प्रतिभाति, संस्कारहीनत्वेन जीवनं निरसं भवति ।

एवं कथयितुं शक्यते यत् संस्काराः मलोपरक्तमात्मानं प्रक्षालयन्ति । एष भौतिकवादिभिः शरीरमेव मानवजीवनस्य सर्वस्वमिति स्वीक्रियते । अतः परं न किमपि वस्तु विश्वासयोग्यम् । अत आत्मनः नैसर्गिकानन्देन ते वञ्चिता भवन्ति ।

अनित्यभूतं शरीरं नित्यत्वेनात्मत्वेन च रक्षणं मानवजीवनस्य महती क्षतिः विडम्वना चास्ति । परन्तु शरीरं धर्मस्याध्यात्मिकसाधनायाः साधनमस्ति, अतः तस्य संरक्षणमावश्यकं तर्तते । तमुपेक्ष्य कश्चिदपि साधकः आध्यात्मिकसिद्धिं प्राप्तुं नशक्नोति । संस्कारशास्त्रीणां सिद्धान्तो वर्तते यत् सृष्टौ जीवने च शरीरं निष्प्रयोजनं नास्ति । अयमात्मनो बाहको जीवनस्य केन्द्रविन्दुश्चास्ति । वस्तुतः अनेकैः वर्णैः यथा चित्रस्य सौन्दर्यमभिवर्धते तथैव अनेकैः संस्कारैः जीवनस्य सौन्दर्यमुन्मीलितं भवति । उक्तञ्च - शरीरमाद्यं खलु धर्मसाधानमिति । केवलं भौतिकशक्त्या आहारविहारादिषु मग्नो नाधिकं कर्तुं पारयति । इहलोकेऽप्यनेके विकाराः प्रवर्तन्त इति ।

सृष्टिकाले प्रजापतेः सर्वेऽपि मानवाः पुंस्त्रीसंयोगेन मैथुनरीत्या प्रभवन्ति । मात्रापित्रा सामाजिकैश्चानुगृहीतः पालितः पोषितो जनः युवा सन् सांसारिककार्याणि निर्वहन् ऐहिकी शारीरलीलामवस्यति। मनीषिणः संस्काराभिधां काचित् विशिष्टां क्रियामेवं विधामुपदिशन्ति।

यावत्कालं संस्काराः यथावदनुष्ठिताः भवन्ति, तावत्कालं पुनरयं समस्तभूमण्डलस्थेदेशे एव किमत्र वक्तव्यं देवलोकेऽपि सम्मानितो भवति। यथा - संस्काराणां विलोप आलस्यप्रमादादिवशात्प्रवृद्धस्तदारभ्यैव

अनभ्यासेन वेदानामाचारस्य च वर्जनात्।

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति ॥(याज्ञवल्क्यस्मृतिः, आचाराध्याय ३४)।

**संस्कारासंपादने ( अकरणे ) हानिः**

प्राचीनकालादेव नैपालिकसमाजोऽपि हिन्दुसनातनदर्शने परिचालितोऽस्ति । अद्यापि भिन्नाः संस्काराः नेपालीजनजीवने अवलम्ब्यन्ते । सनातनहिन्दुसमाजे संस्कारोऽअभिन्नमङ्गं मन्यते । संस्कारेणैव मनुष्यः इह लोके परलोके चोत्तमां गतिं च प्राप्नुवन्ति । वैदिकधर्मशास्त्रानुसारेण विना संस्कारेण मानवशरीरं गर्भादिगुणजन्यैरन्यैश्च दोषैः दोषयुक्तो भवति । तस्मात् संस्कारा अनिवार्याः मन्यते । संस्काराकरणे मानवजीवनः गर्भोपघातादिशरीरजन्य-गुणजन्य-मृत्युजन्यदोषाद् इह लोके सामाजिकरूपेण परलोकेऽपि उत्तमगतिश्च न प्राप्नोति। उदाहरणार्थं गरुडपुराणे बभ्रुवाहननामकप्रेतस्यान्त्येष्टिसंस्कारस्य लोपाद् वायुरूपेण यः यत्रतत्र भ्रमितः । परन्तु तस्यौर्ध्वदैहिकसंस्कारेण, श्राद्धादिकरणेनोत्तमां गतिं च प्राप्तुं समर्थोऽवभवत्। तेनैव प्रकारेण उपनयनसंस्काराऽभावे जनो व्रात्यत्वं गच्छति, सावित्री पतिता भवति। सः यज्ञयागादिषुपितृश्राद्धादिषु, वेदाध्ययने, विवाहादिकर्मसु च समाजिकरूपेण वहिष्कृतोमन्यते। तस्य जीवनमपि साफल्यं न भवति इति।

**निष्कर्षः**

धर्मशास्त्रादिषु ब्राह्मणादीनां वर्णानां संस्काराः प्रतिपादिताः सन्ति । अस्मिन् शोधालेखे संस्कारविषयका विविधाः पक्षाः चर्चिताः सन्ति ।संस्कारस्य स्वरूपम्, संस्कारस्य सङ्ख्या, संस्कारस्य प्रयोजनम्, संस्कारस्य महत्त्वम्, मानवजीवने संस्काराणामावश्यकता, संस्कारहीने सति अर्थात् संस्काराकरणावस्थादयो विषया अत्र समाविष्टा वर्णाताश्च सन्ति। संस्कारसङ्ख्याविषये शास्त्रेषु विदुषां मतैक्यं न दृश्यते। गौतममते संस्कारा अष्टचत्वारिंशत् सन्ति। एवं महर्षिमनुः त्रयोदशः, सुमन्तुः पञ्चविंशतिः, व्यासः षोडशसंस्कारान् परिगणयन्ति। इदानीन्तने प्रायशः षोडशसंस्काराणामेव व्यवहारो दृश्यते। आध्यात्मिकदृष्ट्या सामाजिकदृष्ट्या सांस्कृतिकदृष्ट्या नैतिकदृष्ट्या च संस्काराः सप्रयोजनाः सन्ति । संस्करणं परिष्करणं शोधनमित्यादयो शब्दाः संस्कारस्य पर्यायवाचिनः । संस्कारः मानवजीवनस्याभिन्नमङ्गमस्ति । जीवस्य बीजावस्थात एव संस्कारस्य व्यवस्था पूर्वीयचिन्तने वर्तते । संस्कारेणैव मानवः मानवो भवति, अन्यथा मानवपशुषु भेद एव न दृश्यते। व्यक्ति-गृह-समाज-राष्ट्र-संसाराणां क्रमश उत्तरोत्तर-व्यवस्थितिः संस्कारेणैव सम्भवति। संस्काराः जीवनस्य भिन्नेषु अवसरेषु महत्त्वं पवित्रतां च प्रयच्छन्ति। मानवजीवनस्य विकासस्य भिन्नानि चरणानि न केवलं शारीरिकविकासेनैव सम्बद्धानि सन्ति, अपि तु बुद्ध्या अन्तःकरणेन, आध्यात्मिकाभिव्यक्त्या सहापि वर्तते । एतदर्थं प्रत्येको जनः सचेष्टो भवेत् । अस्मात् कारणात्

संस्काराणामावश्यकता सुष्पष्टमेव दृश्यते । संस्कारा एते सामाजिकतन्द्रामवज्ञाञ्च निराकुर्वन्ति । जीवनविकासक्रमस्य महत्त्वं सामाजिकस्तरे स्पष्टत्वेन प्रकटितो भवति । संस्कारं विना जीवनस्य विकासक्रमे शरीरस्य प्रतिदिनस्यावश्यकताः, आर्थिकव्यापारवत् वा निरसाः चमत्कारहीनाश्च भवन्ति । वस्तुतः संस्कारैरेव जीवनं सङ्गीतमयं सुखदंशान्तिदं च सम्पद्यते, संस्कारहीनत्वेन जीवनं निरसं भवति ।एवं कथयितुं शक्यते यत् संस्काराः मलोपरक्तमात्मानं प्रक्षालयन्ति । मनुष्यस्य व्यक्तित्वविकासः संस्कारैरेव सम्भवति, संस्कृतो जनरेव वर्णाश्रमधर्मानुसारेण नियमितो भवति । स एव च गृहस्थाश्रमे सन्ततिनां योग्याभिभावकः, समाजस्य सुमार्गदर्शकः, राष्ट्रस्य संसारस्य च सन्मार्गप्रेरको भवति, अर्थादित्थं वक्तुं शक्यते, सः वसुधैव कुटुम्बकम्, इत्यादर्शेनादर्शवान् भवति । भौतिकवादिभिः शरीरमेव मानवजीवनस्य सर्वस्वमिति स्वीक्रियते । अतः परं न किमपि वस्तु विश्वासयोग्यं तेषां कृते । आत्मनः नैसर्गिकानन्देन ते वञ्चिता भवन्ति ।अतो वास्तवरूपेण मानवजीवनस्स्यानन्दप्राप्त्यर्थं मानवेन पौरस्त्यधर्मशास्त्रादिचिन्तनानुसारेणाजीवनं संस्कारैः संस्कृतेन भाव्यम् । षोडशसंस्काराणां वैज्ञानिकपक्षस्योद्घाटनविषयइतोप्यधिकंसम्यगनुसन्धातुं शक्यते ।

## कृतज्ञताज्ञापनम्

आलेखस्यास्यसैद्धान्तिकविषयनिरूपणे, प्रविध्यादिविषये च परामर्शं प्रदातृभ्यो विषयविज्ञेभ्यो विद्वद्भ्यो धन्यवादं निवेदयन् हार्दिकीं कृतज्ञतां व्यनज्मि ।

## सन्दर्भसामग्रीसूची

गौतमः (सन् २०२३). *गौतमधर्मसूत्राणि,* चौखम्बा संस्कृतसिरीज अफिस ।

जमुना, पाठक (सन् २०२३). *पारस्कर गृह सूत्रम्.* चौखम्बा कृष्णदास अकादमी ।

भट्टाचार्य, विश्वनाथपञ्चानन (२०६३). *न्यायसिद्धान्तमुक्तावली,*सं. व्यां. पं. कृष्णवल्लभाचार्य, चौखम्बा संस्कृत संस्थान

भट्ट, नीलकण्ठ (सन् १८४८). *संस्कारमयूख,* चौखम्बा कृष्णदास अकादमी ।

मनु (सन् २००७). *मनुस्मृति,* अनु. शिवराज कौडिन्यायन, चौखम्बा संस्कृत संस्थान ।

याज्ञवल्क्यः (सन् २०६५). *याज्ञवल्क्यस्मृति*, (मिताक्षरा व्याख्य), चौखम्बा संस्कृत संस्थान ।

रामकृष्णः (सन् १९९५). *संस्कारगणपति,* चौखम्बा संस्कृतसिरीज अफिस ।

वेदव्यास (२०६०), *श्रीमद्भागवद्गीति* (रामानुजभाष्य हिन्दी अनुवाद ,(हि. अनु. श्रीकृष्णदास गोयन्दका, गीताप्रेस ।